श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ चतुःपञ्चाशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुःपञ्चाशः सर्गः ॥

## वज्रदंष्ट्राङ्गदयोर्युद्धमङ्गदेन तस्य वधश्च

स्वबलस्य च घातेन अङ्गदस्य बलेन च।
राक्षसः क्रोधमाविष्टो वज्रदंष्ट्रो महाबलः॥ **6.54.1** ॥

विस्फार्य च धनुर्घोरं शक्राशनिसमप्रभम्।
वानराणामनीकानि प्राकिरच्छरवृष्टिभिः॥ **6.54.2** ॥

राक्षसाश्चापि मुख्यास्ते रथेषु समवस्थिताः।
नानाप्रहरणाः शूराः प्रायुध्यन्त तदा रणे॥ **6.54.3** ॥

वानराणां च शूरास्तु ते सर्वे प्लवगर्षभाः।
अयुध्यन्त शिलाहस्ताः समवेताः समन्ततः॥ **6.54.4** ॥

तत्रायुधसहस्राणि तस्मिन्नायोधने भृशम्।
राक्षसाः कपिमुख्येषु पातयाञ्चक्रिरे तदा॥ **6.54.5** ॥

वानराश्चैव रक्षःसु गिरिवृक्षान् महाशिलाः।
प्रवीराः पातयामासुर्मत्तवारणसन्निभाः॥ **6.54.6** ॥

शूराणां युध्यमानानां समरेष्वनिवर्तिनाम्।
तद् राक्षसगणानां च सुयुद्धं समवर्तत॥ **6.54.7** ॥

प्रभिन्नशिरसः केचिच्छिन्नः पादैश्च बाहुभिः।
शस्त्रैरर्दितदेहास्तु रुधिरेण समुक्षिताः॥ **6.54.8** ॥

हरयो राक्षसाश्चैव शेरते गां समाश्रिताः।
कङ्कगृध्रबलाढ्याश्च गोमायुकुलसङ्कुलाः॥ **6.54.9** ॥

कबन्धानि समुत्पेतुर्भीरूणां भीषणानि वै।
भुजपाणिशिरश्छिन्नाश्छिन्नकायाश्च भूतले॥ **6.54.10** ॥

वानरा राक्षसाश्चापि निपेतुस्तत्र भूतले।
ततो वानरसैन्येन हन्यमानं निशाचरम्॥ **6.54.11** ॥

प्राभज्यत बलं सर्वं वज्रदंष्ट्रस्य पश्यतः।
राक्षसान् भयवित्रस्तान् हन्यमानान् प्लवङ्गमैः॥ **6.54.12** ॥

दृष्ट्वा स रोषताम्राक्षो वज्रदंष्टः प्रतापवान्।
प्रविवेश धनुष्पाणिस्त्रासयन् हरिवाहिनीम्॥ **6.54.13** ॥

शरैर्विदारयामास कङ्कपत्रैरजिह्मगैः।
बिभेद वानरांस्तत्र सप्ताष्टौ नव पञ्च च॥ **6.54.14** ॥

विव्याध परमक्रुद्धो वज्रदंष्ट्रः प्रतापवान्।
त्रस्ताः सर्वे हरिगणाः शरैः सङ्कृत्तदेहिनः।
अङ्गदं सम्प्रधावन्ति प्रजापतिमिव प्रजाः॥ **6.54.15** ॥

ततो हरिगणान् भग्नान् दृष्ट्वा वालिसुतस्तदा।
क्रोधेन वज्रदंष्ट्रं तमुदीक्षन्तमुदैक्षत॥ **6.54.16** ॥

वज्रदंष्ट्रोऽङ्गदश्चोभौ योयुध्येते परस्परम्।
चेरतुः परमक्रुद्धौ हरिमत्तगजाविव॥ **6.54.17** ॥

ततः शतसहस्रेण हरिपुत्रं महाबलम्।
जघान मर्मदेशेषु शरैरग्निशिखोपमैः॥ **6.54.18** ॥

रुधिरोक्षितसर्वाङ्गो वालिसूनुर्महाबलः।
चिक्षेप वज्रदंष्ट्राय वृक्षं भीमपराक्रमः॥ **6.54.19** ॥

दृष्ट्वा पतन्तं तं वृक्षमसम्भ्रान्तश्च राक्षसः।
चिच्छेद बहुधा सोऽपि मथितः प्रापतद् भुवि॥ **6.54.20** ॥

तं दृष्ट्वा वज्रदंष्ट्रस्य विक्रमं प्लवगर्षभः।
प्रगृह्य विपुलं शैलं चिक्षेप च ननाद च॥ **6.54.21** ॥

तमापतन्तं दृष्ट्वा स रथादाप्लुत्य वीर्यवान्।
गदापाणिरसम्भ्रान्तः पृथिव्यां समतिष्ठत॥ **6.54.22** ॥

अङ्गदेन शिला क्षिप्ता गत्वा तु रणमूर्धनि।
सचक्रकूबरं साश्वं प्रममाथ रथं तदा॥ **6.54.23** ॥

ततोऽन्यच्छिखरं गृह्य विपुलं द्रुमभूषितम्।
वज्रदंष्ट्रस्य शिरसि पातयामास वानरः॥ **6.54.24** ॥

अभवच्छोणितोद्गारी वज्रदंष्ट्रः सुमूर्च्छितः।
मुहूर्तमभवन्मूढो गदामालिङ्ग्य निःश्वसन्॥ **6.54.25** ॥

स लब्धसंज्ञो गदया वालिपुत्रमवस्थितम्।
जघान परमक्रुद्धो वक्षोदेशे निशाचरः॥ **6.54.26** ॥

गदां त्यक्त्वा ततस्तत्र मुष्टियुद्धमकुर्वत।
अन्योन्यं जघ्नतुस्तत्र तावुभौ हरिराक्षसौ॥ **6.54.27** ॥

रुधिरोद्गारिणौ तौ तु प्रहारैर्जनितश्रमौ।
बभूवतुः सुविक्रान्तावङ्गारकबुधाविव॥ **6.54.28** ॥

ततः परमतेजस्वी अङ्गदः प्लवगर्षभः।
उत्पाट्य वृक्षं स्थितवानासीत् पुष्पफलैर्युतः॥ **6.54.29** ॥

जग्राह चार्षभं चर्म खड्गं च विपुलं शुभम्।
किङ्किणीजालसञ्छन्नं चर्मणा च परिष्कृतम्॥ **6.54.30** ॥

चित्रांश्च रुचिरान् मार्गांश्चेरतुः कपिराक्षसौ।
जघ्नतुश्च तदान्योन्यं नर्दन्तौ जयकाङ्क्षिणौ॥ **6.54.31** ॥

व्रणैः सास्त्रैरशोभेतां पुष्पिताविव किंशुकौ।
युध्यमानौ परिश्रान्तौ जानुभ्यामवनीं गतौ॥ **6.54.32** ॥

निमेषान्तरमात्रेण अङ्गदः कपिकुञ्जरः।
उदतिष्ठत दीप्ताक्षो दण्डाहत इवोरगः॥ **6.54.33** ॥

निर्मलेन सुधौतेन खड्गेनास्य महच्छिरः।
जघान वज्रदंष्ट्रस्य वालिसूनुर्महाबलः॥ **6.54.34** ॥

रुधिरोक्षितगात्रस्य बभूव पतितं द्विधा।
तच्च तस्य परीताक्षं शुभं खड्गहतं शिरः॥ **6.54.35** ॥

वज्रदंष्ट्रं हतं दृष्ट्वा राक्षसा भयमोहिताः।
त्रस्ता ह्यभ्यद्रवन् लङ्कां वध्यमानाः प्लवङ्गमैः।
विषण्णवदना दीना ह्रिया किञ्चिदवाङ्मुखाः॥ **6.54.36** ॥

निहत्य तं वज्रधरप्रभावः
    स वालिसूनुः कपिसैन्यमध्ये।
जगाम हर्षं महितो महाबलः
    सहस्रनेत्रस्त्रिदशैरिवावृतः॥ **6.54.37** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुःपञ्चाशः सर्गः॥